# Raghuvansha by Kalidas Chapter 9

# રઘુવંશં સર્ગઃ ૯ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha9

File name : raghuvansha9.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : May 12, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# રઘુવંશં સર્ગઃ ૯ કાલિદાસકૃતમ્

પિતુરનન્તરમુત્તરકોસલાન્સમધિગમ્ય સમાધિજિતેન્દ્રિયઃ ।
દશરથઃ પ્રશશાસ મહારથો યમવતામવતાં ચ ધુરિ સ્થિતઃ ॥ ૯-૧॥

અધિગતં વિધિવદ્યદપાલયત્પ્રકૃતિમણ્ડલમાત્મકુલોચિતમ્ ।
અભવદસ્ય તતો ગુણવત્તરં સનગરં નગરન્ધ્રકરૌજસઃ ॥ ૯-૨॥

ઉભયમેવ વદન્તિ મનીષિણઃ સમયવર્ષિતયા કૃતકર્મણામ્।
બલનિષૂદનમર્થપતિં ચ તં શ્રમનુદં મનુદણ્ડધરાન્વયમ્ ॥ ૯-૩॥

જનપદે ન ગદઃ પદમાદધાવભિભવઃ કુત એવ સપત્નજઃ ।
ક્ષિતિરભૂત્ફલવત્યજનન્દને શમરતેઽમરતેજસિ પાર્થિવે ॥ ૯-૪॥

દશદિગન્તજિતા રઘુણા યથા શ્રિયમપુષ્યદજેન તતઃ પરમ્ ।
તમધિગમ્ય તથૈવ પુનર્બભૌ ન ન મહીનમહીનપરાક્રમમ્ ॥ ૯-૫॥

સમતયા વસુવૃષ્ટિવિસર્જનૈર્નિયમનાદસતાં ચ નરાધિપઃ ।
અનુયયૌ યમપુણ્યજનેશ્વરૌ સવરુણાવરુણાગ્રસરં રુચા ॥ ૯-૬॥

ન મૃગયાભિરતિર્ન દુરોદરં ન ચ શશિપ્રતિમાભરણં મધુ ।
તમુદયાય ન વા નવયૌવના પ્રિયતમા યતમાનમપાહરત્ ॥ ૯-૭॥

ન કૃપણા પ્રભવત્યપિ વાસવે ન વિતથા પરિહાસકથાસ્વપિ ।
ન ચ સપત્નજનેષ્વપિ તેન વાગપરુષા પરુષાક્ષરમીરિતા ॥ ૯-૮॥

ઉઅદયમસ્તમયં ચ રઘૂદ્વહાદુભયમાનશિરે વસુધાધિપાઃ ।
સ હિ નિદેશમલઙ્ઘયતામભૂત્સુહૃદયોહૃદયઃ પ્રતિગર્જતામ્ ॥ ૯-૯॥

અજયદેકરથેન સ મેદિનીમુદધિનેમિમધિજ્યશરાસનઃ ।
જયમઘોષયદસ્ય તુ કેવલં ગજવતી જવતીવ્રહયા ચમૂઃ ॥ ૯-૧૦॥

અવનિમેકરથેન વરૂથિના જિતવતઃ કિલ તસ્ય ધનુર્ભૃતઃ ।
વિજયદુન્દુભિતાં યયુરર્ણવા ઘનરવા નરવાહનસંપદઃ ॥ ૯-૧૧॥

શમિતપક્ષબલઃ શતકોટિના શિખરિણાં કુલિશેન પુરંદરઃ ।
સ શરવૃષ્ટિમુચા ધનુષા દ્વિષાં સ્વનવતા નવતામરસાનનઃ ॥ ૯-૧૨॥

ચરણયોર્નખરાગસમૃદ્ધિભિર્મુકુટરત્નમરીચિભિરસ્પૃશન્ ।
નૃપતયઃ શતશો મરુતો યથા શતમખં તમખણ્ડિતપૌરુષમ્ ॥ ૯-૧૩॥

નિવવૃતે સ મહાર્ણવરોધસઃ સચિવકારિતબાલસુતાઞ્જલીન્ ।
સમનુકમ્પ્ય સપત્નપરિગ્રહાનનલકાનલકાનવમાં પુરીમ્ ॥ ૯-૧૪॥

ઉપગતોઽપિ ચ મણ્ડલનાભિતામનુદિતાન્યસિતાતપવારણઃ ।
શ્રિયમવેક્ષ્ય સ રન્ધ્રચલામભૂદનલસોઽનલસોમસમદ્યુતિઃ ॥ ૯-૧૫॥

તમપહાય કકુત્સ્થકુલોદ્ભવં પુરુષમાત્મભવં ચ પતિવ્રતા ।
નૃપતિમન્યમસેવત દેવતા સકમલા કમલાઘવમર્થિષુ ॥ ૯-૧૬॥

તમલભન્ત પતિં પતિદેવતાઃ શિખરિણામિવ સાગરમાપગાઃ ।
મગધકોસલકેકયશાસિનાં દુહિતરોઽહિતરોપિતમાર્ગણમ્ ॥ ૯-૧૭॥

પ્રિયતમાભિરસૌ તિસૃભિર્બભૌ તિસૃભિરેવ ભુવં સહ શક્તિભિઃ ।
ઉપગતો વિનિનીષુરિવ પ્રજા હરિહયોઽરિહયોગવિચક્ષણઃ ॥ ૯-૧૮॥

સ કિલ સંયુગમૂર્ધ્નિ સહાયતાં મઘવતઃ પ્રતિપદ્ય મહારથઃ ।
સ્વભુજવીર્યમગાપયદુચ્છ્રિતં સુરવધૂરવધૂતભયાઃ શરૈઃ ॥ ૯-૧૯॥

ક્રતુષુ તેન વિસર્જિતમૌલિના ભુજસમાહૃતદિગ્વસુના કૃતાઃ ।
કનકયૂપસમુચ્છ્રયશોભિનો વિતમસા તમસાસરયૂતટાઃ ॥ ૯-૨૦॥

અજિનદણ્ડભૃતં કુશમેખલાં યતગિરં મૃગશ‍ૃઙ્ગપરિગ્રહામ્ ।
અધિવસંસ્તનુમધ્વરદીક્ષિતામસમભાસમભાસયદીશ્વરઃ ॥ ૯-૨૧॥

અવભૃથપ્રયતો નિયતેન્દ્રિયઃ સુરસમાજસમાક્રમણોચિતઃ ।
નમયતિ સ્મ સ કેવલમુન્નતં વનમુચે નમુચેરરયે શિરઃ ॥ ૯-૨૨॥

અસકૃદેકરથેન તરસ્વિના હરિહયાગ્રસરેણ ધનુર્ભૃતા ।
દિનકરાભિમુખા રણરેણવો રુરુધિરે રુધિરેણ સુરદ્વિષામ્ ॥ ૯-૨૩॥

અથ સમાવવૃતે કુસુમૈર્નવૈસ્તમિવ સેવિતુમેકનરાધિપમ્ ।
યમકુબેરજલેશ્વરવજ્રિણાં સમધુરં મધુરઞ્ચિતવિક્રમમ્ ॥ ૯-૨૪॥

જિગમિષુર્ધનદાધ્યુષિતાં દિશં રથયુજા પરિવર્તિતવાહનઃ ।
દિનમુખાનિ રવિર્હિમનિગ્રહૈર્વિમલયન્મલયં નગમત્યજત્ ॥ ૯-૨૫॥

કુસુમજન્મ તતો નવપલ્લવાસ્તદનુ ષટ્પદકોકિલકૂજિતમ્ ।
ઇતિ યથાક્રમમાવિરભૂન્મધુર્દ્રુમવતીમવતીર્ય વનસ્થલીમ્ ॥ ૯ -૨૬ ॥

નયગુણોપચિતામિવ ભૂપતેઃ સદુપકારફલાં શ્રિયમર્થિનઃ ।
અભિયયુઃ સરસો મધુસંભૃતાં કમલિનીમલિનીરપતત્રિણઃ ॥ ૯ -૨૭ ॥

કુસુમમેવ ન કેવલમાર્તવં નવમશોકતરોઃ સ્મરદીપનમ્ ।
કિસલયપ્રસવોઽપિ વિલાસિનાં મદયિતા દયિતાશ્રવણાર્પિતઃ ॥ ૯ -૨૮ ॥

વિરચિતા મધુનોપવનશ્રિયામભિનવા ઇવ પત્રવિશેષકાઃ ।
મધુલિહાં મધુદાનવિશારદાઃ કુરબકા રવકારણતાં યયુઃ ॥ ૯ -૨૯ ॥

સુવદનાવદનાસવસંભૃતસ્તદનુવાદિગુણઃ કુસુમોદ્ગમઃ ।
મધુકરૈરકરોન્મધુલોલુપૈર્બકુલમાકુલમાયતપઙ્ક્તિભિઃ ॥ ૯ -૩૦ ॥

ઉપહિતં શિશિરાપગમશ્રિયા મુકુલજાલમશોભત કિંશુકે ।
પ્રણયિનીવ નખક્ષતમણ્ડનં પ્રમદયા મદયાપિતલજ્જયા ॥ ૯ -૩૧ ॥

વ્રણગુરુપ્રમદાધરદુઃસહં જઘનનિર્વિષયીકૃતમેખલમ્ ।
ન ખલુ તાવદશેષમપોહિતું રવિરલં વિરલં કૃતવાન્હિમમ્ ॥ ૯ -૩૨ ॥

અભિનયાન્પરિચેતુમિવોદ્યતા મલયમારુતકમ્પિતપલ્લવા ।
અમદયત્સહકારલતા મનઃ સકલિકા કલિકામજિતામપિ ॥ ૯ -૩૩ ॥

પ્રથમમન્યભૃતાભિરુદીરિતાઃ પ્રવિરલા ઇવ મુગ્ધવધૂકથાઃ ।
સુરભિગન્ધિષુ શુશ્રુવિરે ગિરઃ કુસુમિતાસુ મિતા વનરાજિષુ ॥ ૯ -૩૪ ॥

શ્રુતિસુખભ્રમરસ્વનગીતયઃ કુસુમકોમલદન્તરુચો બભુઃ ।
ઉપવનાન્તલતાઃ પવનાહતૈઃ કિસલયૈઃ સલયૈરિવ પાણિભિઃ ॥ ૯ -૩૫ ॥

લલિતવિભ્રમબન્ધવિચેક્ષણં સુરભિગન્ધપરાજિતકેસરમ્ ।
પતિષુ નિર્વિવિશુર્મધુમઙ્ગનાઃ સ્મરસખં રસખણ્ડનવર્જિતમ્ ॥ ૯ -૩૬ ॥

શુશુભિરે સ્મિતચારુતરાનનાઃ સ્ત્રિય ઇવ શ્લથશિઞ્જિતમેખલાઃ ।
વિકચતામરસા ગૃહદીર્ઘિકા મદકલોદકલોલવિહંગમાઃ ॥ ૯ -૩૭ ॥

ઉપયયૌ તનુતાં મધુખણ્ડિતા હિમકરોદયપાણ્ડુમુખચ્છવિઃ ।
સદૃશમિષ્ટસમાગમનિર્વૃતિં વનિતયાનિતયા રજનીવધૂઃ ॥ ૯ -૩૮ ॥

અપતુષારતયા વિશદપ્રભૈઃ સુરતસઙ્ગપરિશ્રમનોદિભિઃ ।

કુસુમચાપમતેજયદંશુભિર્હિમકરો મકરોર્જિતકેતનમ્ ॥ ૯-૩૯॥

હુતહુતાશનદીપ્તિ વનશ્રિયઃ પ્રતિનિધિઃ કનકાભરણસ્ય યત્ ।
યુવતયઃ કુસુમં દધુરાહિતં તદલકે દલકેસરપેશલમ્ ॥ ૯-૪૦॥

અલિભિરઞ્જનબિન્દુમનોહરૈઃ કુસુમપઙ્ક્તિનિપાતિભિરઙ્કિતઃ ।
ન ખલુ શોભયતિ સ્મ વનસ્થલીં ન તિલકસ્તિલકઃ પ્રમદામિવ ॥ ૯-૪૧॥

અમદયન્મધુગન્ધસનાથયા કિસલયાધરસંગતયા મનઃ ।
કુસુમસંભૃતયા નવમલ્લિકા સ્મિતરુચા તરુચારુવિલાસિની ॥ ૯-૪૨॥

અરુણરાગનિષેધિભિરંશુકૈઃ શ્રવણલબ્ધપદૈશ્ચ યવાઙ્કુરૈઃ ।
પરભૃતાવિરુતૈશ્ચ વિલાસિનઃ સ્મરબલૈરબલૈકરસાઃ કૃતાઃ ॥ ૯-૪૩॥

ઉપચિતાવયવા શુચિભિઃ કણૈરલિકદમ્બકયોગમુપેયુષી ।
સદૃશકાન્તિરલક્ષ્યત મઞ્જરી તિલકજાલકજાલકમૌક્તિકૈઃ ॥ ૯-૪૪॥

ધ્વજપટં મદનસ્ય ધનુર્ભૃતશ્છવિકરં મુખચૂર્ણમૃતુશ્રિયઃ ।
કુસુમકેસરરેણુમલિવ્રજાઃ સપવનોપવનોત્થિતમન્વયુઃ ॥ ૯-૪૫॥

અનુભવન્નવદોલમૃતૂત્સવં પટુરપિ પ્રિયકણ્ઠજિઘૃક્ષયા ।
અનયદાસનરજ્જુપરિગ્રહે ભુજલતાં જલતામબલાજનઃ ॥ ૯-૪૬॥

ત્યજત માનમલં બત વિગ્રહૈર્ન પુનરેતિ ગતં ચતુરં વયઃ ।
પરભૃતાભિરિતીવ નિવેદિતે સ્મરમતે રમતે સ્મ વધૂજનઃ ॥ ૯-૪૭॥

અથ યથાસુખમાર્તવમુત્સવં સમનુભૂય વિલાસવતીસખઃ ।
નરપતિશ્ચકમે મૃગયારતિં સ મધુમન્મધુમન્મથસંનિભઃ ॥ ૯-૪૮॥

પરિચયં ચલલક્ષ્યનિપાતને ભયરુષોશ્ચ તદિઙ્ગિતબોધનમ્ ।
શ્રમજયાત્પ્રગુણાં ચ કરોત્યસૌ તનુમતોઽનુમતઃ સચિવૈર્યયૌ ॥ ૯-૪૯॥

મૃગવનોપગમક્ષમવેષભૃદ્વિપુલકણ્ઠનિષક્તશરાસનઃ ।
ગગનમશ્વખુરોદ્ધતરેણુભિર્નૃસવિતા સ વિતાનમિવાકરોત્ ॥ ૯-૫૦॥

ગ્રથિતમૌલિરસૌ વનમાલયા તરુપલાશસવર્ણતનુચ્છદઃ ।
તુરગવલ્ગનચઞ્ચલકુણ્ડલો વિરુરુચે રુરુચેષ્ટિતભૂમિષુ ॥ ૯-૫૧॥

તનુલતાવિનિવેશિતવિગ્રહા ભ્રમરસંક્રમિતેક્ષણવૃત્તયઃ ।
દદૃશુરધ્વનિ તં વનદેવતાઃ સુનયનં નયનન્દિતકોસલમ્ ॥ ૯-૫૨॥

શ્વગણિવાગુરિકૈઃ પ્રથમાસ્થિતં વ્યપગતાનલદસ્યુ વિવેશ સઃ ।
સ્થિરતુરંગમભૂમિ નિપાનવન્મૃગવયોગવયોપચિતં વનમ્ ॥ ૯ -૫૩ ॥

અથ નભસ્ય ઇવ ત્રિદશાયુધં કનકપિઙ્ગતડિદ્ગુણસંયુતમ્ ।
ધનુરધિજ્યમનાધિરુપાદદે નરવરો રવરોષિતકેસરી ॥ ૯ -૫૪ ॥

તસ્ય સ્તનપ્રણયિભિર્મુહુરેણશાવૈ-
ર્વ્યાહન્યમાનહરિણીગમનં પુરસ્તાત્ ।
આવિર્બભૂવ કુશગર્ભમુખં મૃગાણાં
યૂથં તદગ્રસરગર્વિતકૃષ્ણસારમ્ ॥ ૯ -૫૫ ॥

તત્પ્રાર્થિતં જવનવાજિગતેન રાજ્ઞા
તૂણીમુખોદ્ધૃતશરેણ વિશીર્ણપઙ્ક્તિ ।
શ્યામીચકાર વનમાકુલદૃષ્ટિપાતૈ-
ર્વાતેરિતોત્પલદલપ્રકરૈરિવાર્દ્રૈઃ ॥ ૯ -૫૬ ॥

લક્ષ્યીકૃતસ્ય હરિણસ્ય હરિપ્રભાવઃ
પ્રેક્ષ્ય સ્થિતાં સહચરીં વ્યવધાય દેહમ્ ।
આકર્ણકૃષ્ટમપિ કામિતયા સ ધન્વી
બાણં કૃપામૃદુમનાઃ પ્રતિસંજહાર ॥ ૯ -૫૭ ॥

તસ્યાપરેષ્વપિ મૃગેષુ શરાન્મુમુક્ષોઃ
કર્ણાન્તમેત્ય બિભિદે નિબિડોઽપિ મુષ્ટિઃ ।
ત્રાસાતિમાત્રચટુલૈઃ સ્મરતઃ સુનેત્રૈઃ
પ્રૌઢપ્રિયાનયનવિભ્રમચેષ્ટિતાનિ ॥ ૯ -૫૮ ॥

ઉત્તસ્થુષઃ સપદિ પલ્વલપઙ્કમધ્યા-
ન્મુસ્તાપ્રરોહકવલાવયવાનુકીર્ણમ્ ।
જગ્રાહ સ દ્રુતવરાહકુલસ્ય માર્ગં
સુવ્યક્તમાર્દ્રપદપઙ્ક્તિભિરાયતાભિઃ ॥ ૯ -૫૯ ॥

તં વાહનાદવનતોત્તરકાયમીષ-
દ્વિધ્યન્તમુદ્ધૃતસટાઃ પ્રતિહન્તુમીષુઃ ।
નાત્માનમસ્ય વિવિદુઃ સહસા વરાહા
વૃક્ષેષુ વિદ્ધમિષુભિર્જઘનાશ્રયેષુ ॥ ૯ -૬૦ ॥

તેનાભિઘાતરભસસ્ય વિકૃષ્ય પત્રી

વન્યસ્ય નેત્રવિવરે મહિષસ્ય મુક્તઃ ।
નિર્ભિદ્ય વિગ્રહમશોણિતલિપ્તપુઙ્ખ-
સ્તં પાતયાં પ્રથમમાસ પપાત પશ્ચાત્ ॥ ૯-૬૧॥

પ્રાયો વિષાણપરિમોક્ષલઘૂત્તમાઙ્ગા-
ન્ખડ્ગાંશ્ચકાર નૃપતિર્નિશિતૈઃ ક્ષુરપ્રૈઃ ।
શૃઙ્ગં સ દૃપ્તવિનયાધિકૃતઃ પરેષા-
મત્યુચ્છ્રિતં ન મમૃષે ન તુ દીર્ઘમાયુઃ ॥ ૯-૬૨॥

વ્યાઘ્રાનભીરભિમુખોત્પતિતાન્ગુહાભ્યઃ
ફુલ્લાસનાગ્રવિટપાનિવ વાયુરુગ્ણાન્ ।
શિક્ષાવિશેષલઘુહસ્તતયા નિમેષા-
ત્તૂણીચકાર શરપૂરિતવક્ત્રરન્ધ્રાન્ ॥ ૯-૬૩॥

નિર્ઘાતોગ્રૈઃ કુઞ્જલીનાઞ્જિઘાંસુર્જ્યાનિર્ઘોષૈઃ ક્ષોભયામાસ સિંહાન્ ।
નૂનં તેષામભ્યસૂયાપરોઽભૂદ્વીર્યોદગ્રે રાજશબ્દો મૃગેષુ ॥ ૯-૬૪॥

તાન્હત્વા ગજકુલબદ્ધતીવ્રવૈરાન્કાકુત્સ્થઃ કુટિલનખાગ્રલગ્નમુક્તાન્ ।
આત્માનં રણકૃતકર્મણાં ગજાનામાનૃણ્યં ગતમિવ માર્ગણૈરમંસ્ત ॥ ૯-૬૫॥

ચમરાન્પરિતઃ પ્રવર્તિતાશ્વઃ ક્વચિદાકર્ણવિકૃષ્ટભલ્લવર્ષી ।
નૃપતીનિવ તાન્વિયોજ્ય સદ્યઃ સિતબાલવ્યજનૈર્જગામ શન્તિમ્ ॥ ૯-૬૬॥

અપિ તુરગસમીપાદુત્પતન્તં મયૂરં
ન સ રુચિરકલાપં બાણલક્ષ્યીચકાર ।
સપદિ ગતમનસ્કશ્ચિત્રમાલ્યાનુકીર્ણે
રતિવિગલિતબન્ધે કેશપાશે પ્રિયાયાઃ ॥ ૯-૬૭॥

તસ્ય કર્કશવિહારસંભવં સ્વેદમાનનવિલગ્નજાલકમ્ ।
આચચામ સતુષારશીકરો ભિન્નપલ્લવપુટો વનાનિલઃ ॥ ૯-૬૮॥

ઇતિ વિસ્મૃતાન્યકરણીયમાત્મનઃ સચિવાવલમ્બિધુરં ધરાધિપમ્ ।
પરિવૃદ્ધરાગમનુબન્ધસેવયા મૃગયા જહાર ચતુરેવ કામિની ॥ ૯-૬૯॥

સ લલિતકુસુમપ્રવાલશય્યાં જ્વલિતમહૌષધિદીપિકાસનાથામ્ ।
નરપતિરતિવાહયાંબભૂવ ક્વચિદસમેતપરિચ્છદસ્ત્રિયામામ્ ॥ ૯-૭૦॥

ઉષસિ સ ગજયૂથકર્ણતાલૈઃ પટુપટહધ્વનિભિર્વિનીતનિદ્રઃ ।
અરમત મધુરાણિ તત્ર શૃણ્વન્વિહગવિકૂચિતબન્દિમઙ્ગલાનિ ॥ ૯-૭૧॥

અથ જાતુ રુરોર્ગૃહીતવર્ત્મા વિપિને પાર્શ્વચરૈરલક્ષ્યમાણઃ ।
શ્રમફેનમુચા તપસ્વિગાઢાં તમસાં પ્રાપ નદીં તુરંગમેણ ॥ ૯-૭૨॥

કુમ્ભપૂરણભવઃ પટુરુચ્ચૈરુચ્ચચાર નિનદોઽમ્ભસિ તસ્યાઃ ।
તત્ર સ દ્વિરદબૃંહિતશઙ્કી શબ્દપાતિનમિષું વિસસર્જ ॥ ૯-૭૩॥

નૃપતેઃ પ્રતિષિદ્ધમેવ તત્કૃતવાન્પઙ્ક્તિરથો વિલઙ્ઘ્ય યત્ ।
અપથે પદમર્પયન્તિ હિ શ્રુતવન્તોઽપિ રજોનિમીલિતાઃ ॥ ૯-૭૪॥

હા તાતેતિ ક્રન્દિતમાકર્ણ્ય વિષણ્ણ-
સ્તસ્યાન્વિષ્યન્વેતસગૂઢં પ્રભવં સઃ ।
શલ્યપ્રોતં પ્રેક્ષ્ય સકુમ્ભં મુનિપુત્રં
તાપાદન્તઃશલ્ય ઇવાસીત્ક્ષિતિપોઽપિ ॥ ૯-૭૫॥

તેનાવતીર્ય તુરગાત્પ્રથિતાન્વયેન
પૃષ્ટાન્વયઃ સ જલકુમ્ભનિષણ્ણદેહઃ ।
તસ્મૈ દ્વિજેતરતપસ્વિસુતં સ્ખલદ્ભિ-
રાત્માનમક્ષરપદૈઃ કથયાંબભૂવ ॥ ૯-૭૬॥

તચ્ચોદિતઃ સ તમનુદ્ધૃતશલ્યમેવ પિત્રોઃ સકાશમવસન્નદૃશોર્નિનાય ।
તાભ્યાં તથાગતમુપેત્ય તમેકપુત્રમજ્ઞાનતઃ સ્વચરિતં નૃપતિઃ શશંસ ॥ ૯-૭૭॥

તૌ દંપતી બહુ વિલપ્ય શિશોઃ પ્રહર્ત્રા
શલ્યં નિખાતમુદહારયતામુરસ્તઃ ।
સોઽભૂત્પરાસુરથ ભૂમિપતિં શશાપ
હસ્તાર્પિતૈર્નયનવારિભિરેવ વૃદ્ધઃ ॥ ૯-૭૮॥

દિષ્ટાન્તમાપ્સ્યતિ ભવાનપિ પુત્રશોકા-
દન્ત્યે વયસ્યહમિવેતિ તમુક્તવન્તમ્ ।
આક્રાન્તપૂર્વમિવ મુક્તવિષં ભુજંગં
પ્રોવાચ કોસલપતિઃ પ્રથમાપરાદ્ધઃ ॥ ૯-૭૯॥

શાપોઽપ્યદૃષ્ટતનયાનનપદ્મશોભે
સાનુગ્રહો ભગવતા મયિ પાતિતોઽયમ્ ।
કૃષ્યાં દહન્નપિ ખલુ ક્ષિતિમિન્ધનેદ્ધો
બીજપ્રરોહજનનીં જ્વલનઃ કરોતિ ॥ ૯-૮૦॥

ઇત્થં ગતે ગતઘૃણઃ કિમયં વિધત્તાં વધ્યસ્તવેત્યભિહિતો વસુધાધિપેન ।
એધાન્હુતાશનવતઃ સ મુનિર્યયાચે પુત્રં પરાસુમનુગન્તુમનાઃ સદારઃ ॥ ૯-૮૧॥

પ્રાપ્તાનુગઃ સપદિ શાસનમસ્ય રાજા
સંપાદ્ય પાતકવિલુપ્તધૃતિર્નિવૃત્તઃ ।
અન્તર્નિવિષ્ટપદમાત્મવિનાશહેતું
શાપં દધજ્જ્વલનમૌર્વમિવામ્બુરાશિઃ ॥ ૯-૮૨॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસકૃતૌ
મૃગયાવર્ણનો નામ નવમઃ સર્ગઃ ॥

---

Encoded and Proofread by Arvind Kolhatkar akolhatkar at rogers.com

---

*Raghuvansha by Kalidas Chapter 9*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*